**Series SKS/C**

कोड नं. **49**
**Code No.**

रोल नं.
Roll No. | | | | | | | |

परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।

Candidates must write the Code on the title page of the answer-book.

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ 12 हैं ।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें ।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में 12 प्रश्न हैं ।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें ।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे ।
- Please check that this question paper contains **12** printed pages.
- Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **12** questions.
- **Please write down the Serial Number of the question before attempting it.**
- 15 minutes time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period.

# संस्कृतम् (ऐच्छिकम्)

# SANSKRIT (Elective)

*निर्धारित समय : 3 घण्टे* *अधिकतम अंक : 100*

*Time allowed : 3 hours* *Maximum Marks : 100*

*निर्देशाः :*

*निर्देश :*

***Instructions :***

1. *उत्तराणि, उत्तरपुस्तिकायाम् एव लेखनीयानि ।*
   *उत्तर, उत्तर-पुस्तिका में ही लिखें ।*
   *Write answers, in the answer-sheet only.*

2. *संकेताभावे सर्वेषां प्रश्नानामुत्तराणि, संस्कृतेनैव लेखनीयानि ।*
   *जहाँ संकेत न हो, वहाँ सभी प्रश्नों के उत्तर संस्कृत में ही लिखें ।*

   *Answer all questions in Sanskrit, unless instructions are given otherwise.*

*अस्मिन् प्रश्नपत्रे **चत्वारः** खण्डाः सन्ति ।*

*इस प्रश्न-पत्र में **चार** खण्ड हैं ।*

*There are **four** sections in this question paper.*

| | | |
|---|---|---|
| खण्डः क | अपठितांश – अवबोधनम् (अपठितांश – अवबोधन) | 15 अङ्काः |
| SECTION A | (Unseen Reading Comprehension) | |
| खण्डः ख | संस्कृतेन रचनात्मकलेखनम् (संस्कृत में रचनात्मक लेखन) | 15 अङ्काः |
| SECTION B | (Writing Skills in Sanskrit) | |
| खण्डः ग | पठितांश – अवबोधनम् संस्कृतसाहित्यस्य परिचयः च (पठितांश – अवबोधन एवं संस्कृत साहित्य-परिचय) | 40+10=50 अङ्काः |
| SECTION C | (Reading Comprehension and Introduction to History of Sanskrit Literature) | |
| खण्डः घ | छन्दोऽलङ्काराः (छन्द एवं अलङ्कार) | 20 अङ्काः |
| SECTION D | (Metres and Figures of Speech) | |

## खण्डः क (SECTION A)
### अपठितांश – अवबोधनम्
### अपठितांश – अवबोधन
### Unseen Reading Comprehension

*15*

1. अधोलिखितम् अनुच्छेदद्वयं पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत :
निम्नलिखित **दोनों** अनुच्छेदों को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए :
Read the following **two** passages and answer the given questions in Sanskrit :

(क) **प्रथमः अनुच्छेदः**

वयं सर्वे मानवाः । प्रमादकरणं मानवस्वभावः । सर्वैः एव ज्ञाततया अज्ञाततया वा प्रमादः क्रियते परन्तु प्रमादानां विषये एव चिन्तनं परित्यज्य सत्कार्याणि कर्तुं प्रयासः करणीयः । निर्धनाय धनदानं, दुर्बलस्य सहायता, रुग्णस्य सेवा, इत्यादीनि कार्याणि सत्कार्याणि । या सेवा क्रियेत तदर्थं फलस्य इच्छा न करणीया । सेवाकार्ये विरामः कुतः ? धनस्य लोभः, साधनानां मोहः, आलस्यम् अस्मान् सेवाकार्यात् विमुखान् करोति । सेवाविषये सीमा नास्ति । नूतनानि सेवाकार्याणि कर्तव्यानि । इदमेव जीवनस्य उद्देश्यम् ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत ।
एक शब्द में उत्तर दीजिए ।
Answer in one word. $\frac{1}{2} \times 2=1$
(i) केषां विषये चिन्तनं न कर्तव्यम् ?
(ii) कस्मिन् कार्ये विरामः नास्ति ?

(ब) पूर्णवाक्येन उत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. $1 \times 2=2$
कीदृशानि कार्याणि सत्कार्याणि ?

(स) यथानिर्देशम् उत्तरत ।
यथानिर्देश उत्तर दीजिए ।
Answer as directed. $\frac{1}{2} \times 4=2$
(i) 'नास्ति' इति क्रियापदस्य कर्तृपदं किम् ?
(ii) 'नूतनानि' इति विशेषणपदस्य विशेष्यं किम् ?
(iii) 'ज्ञाततया' इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम् ?
(iv) 'प्रयत्नः' इति अर्थे किं पदमत्र प्रयुक्तम् ?

(ख) **द्वितीयः अनुच्छेदः**

जीवने विभिन्नाः समस्याः आयान्ति । यत्र समस्या भवेत् तत्रैव तस्याः निवारणार्थम् उपायाः अपि भवन्ति । तत्र धैर्यस्य आवश्यकता भवति । ज्येष्ठानां, प्राज्ञानाम्, अनुभविनां च मार्गदर्शनं प्राप्यताम् । येषाम् उपायानाम् अनुसरणम् असाध्यम्, ते सर्वे त्यक्तव्याः । यः आत्मबलं वर्धयति, मानसिकीं शान्तिं प्रयच्छति सः एव समुचितः निर्णयः । निर्णयं कृत्वा क्रियान्वयनं करोतु । मम यत्नः फलकारी भवेत् इति आत्मविश्वासः भवेत् हृदये । सदा विजयविषये एव चिन्त्यताम् । यदि पराजयः भवति तदापि चिन्ता न करणीया । पराजयः एव अग्रिमस्य जयस्य सोपानम् भविष्यति । पुनः पुनः प्रयत्नः करणीयः । पराजयस्य कारणम् अन्येषु नास्ति । पराजयस्य कारणम् आत्मनि एव द्रष्टव्यम् । नूतनं मार्गम् अवलम्ब्य जयाय पुनः प्रयत्नः विधेयः । यत्र श्रमः तत्र जयः ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत ।

एक शब्द में उत्तर दीजिए ।

Answer in one word. *1×2=2*

(i) समस्यानां निवारणार्थं कस्य आवश्यकता भवति ?

(ii) निर्णयं कृत्वा किं करोतु जनः ?

(ब) पूर्णवाक्येन उत्तरत ।

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence. *2×1=2*

समस्यानां निवारणार्थं किं करणीयम् ?

(स) यथानिर्देशम् उत्तरत ।

यथानिर्देश उत्तर दीजिए ।

Answer as directed. *1×4=4*

(i) 'आयान्ति' इति क्रियापदस्य कर्तृपदं किम् ?

(ii) 'बुद्धिमताम्' इति अर्थे किं पदमत्र प्रयुक्तम् ?

(iii) 'साध्यम्' इत्यस्य किं विलोमपदमत्र प्रयुक्तम् ?

(iv) 'अग्रिमस्य' इति विशेषणपदस्य विशेष्यं किम् ?

(द) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत ।

इस अनुच्छेद के लिए उपयुक्त शीर्षक संस्कृत में लिखिए ।

Write a suitable title for this passage in Sanskrit. *2*

## खण्डः ख (SECTION B)
## संस्कृतेन रचनात्मकलेखनम्
## संस्कृत में रचनात्मक लेखन
## Writing Skills in Sanskrit

*15*

**2.** मञ्जूषातः उचितसङ्केतान् गृहीत्वा अधोलिखितां कथां पूरयित्वा लिखत :

मञ्जूषा से उचित सङ्केत लेकर निम्नलिखित कथा को पूरा करके लिखिए :

Complete and rewrite the following story, with the help of the words given in the box below : *1×10=10*

**कथा**

एकः राजा भवने प्रविष्टं तापसम् अवदत् — (i) __________ ! भवतः आगमनेन मम राजभवनं पवित्रम् जातम् । (ii) __________ किम् अहम् ददानि ? तपस्वी अवदत् — यद्वस्तु (iii) __________ तदेव ददातु इति । राज्यं ददामि किम् ? तत् तु (iv) __________ दत्तम् । महाराजः (v) __________ मूकः अभवत् । तदा तापसः अवदत् — राजन् ! भवतः मनसि यः अहङ्कारः सः पूर्णतः (vi) __________ एव । तस्य दानं (vii) __________ । महाराजः तापसस्य (viii) __________ अपतत् । तस्मात् (ix) __________ सः राजा अनासक्तः (x) __________ इव राज्यम् अकरोत् ।

**मञ्जूषा**

| |
|---|
| वदतु, प्रजाजनैः, भवदीयः, चरणयोः, तच्छ्रुत्वा, त्वदीयम्, दिनात्, प्रभो !, करोतु, योगी । |

**3.** मञ्जूषातः पदानि चित्वा "गणतन्त्रदिवसम्" इति विषयम् अधिकृत्य **पञ्च** वाक्यानि संस्कृतेन लिखत् ।

मञ्जूषा से पद चुनकर "गणतन्त्र दिवस" विषय पर संस्कृत में **पाँच** वाक्य लिखिए ।

Write **five** sentences in Sanskrit describing "Republic Day (गणतन्त्र दिवस)" with the help of the words given in the box below. *1×5=5*

**मञ्जूषा**

| |
|---|
| 1950 तमे वर्षे, भारतम्, स्वकीयं संविधानम्, महान् समारोहः, राष्ट्रियध्वजारोहणं, रात्रौ भवनेषु, विशेषसमारोहाः, दीपमालाः, प्रचलति शोभायात्रा, विजयचतुष्पथात्, राष्ट्रपतिः, ददाति, पदकानि । |

## खण्डः ग (SECTION C)

### पठितांश – अवबोधनम् संस्कृतसाहित्यस्य परिचयः च

### पठितांश – अवबोधन एवं संस्कृत साहित्य-परिचय

### Reading Comprehension and Introduction to History of Sanskrit Literature

*40+10=50*

**4.** अधोलिखितं गद्यांशं, पद्यं, नाट्यांशं च पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत :

निम्नलिखित गद्यांश, पद्य तथा नाट्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए :

Read the following prose, poetry and drama passages and answer the given questions in Sanskrit :

(क) **गद्यांशः**

ततो ब्राह्मणस्तानि रत्नानि गृहीत्वा उज्जयिनीं यावदागतस्तावद्यज्ञसमाप्तिर्जाता । राजावभृथस्नानं कृत्वा सर्वानर्थिजनान् परिपूर्ण-मनोरथान् अकरोत् । ब्राह्मणो राजानं दृष्ट्वा रत्नान्यर्पयित्वा प्रत्येकं तेषां गुणकथनमकथयत् । ततो राजा अवदत् – त्वमेतेषां रत्नानां मध्ये यत्तुभ्यं रोचते तद्गृहाणेति । ब्राह्मणेनोक्तम् — गृहं गत्वा यत् सर्वेभ्यो रोचते तद्ग्रहीष्यामि इति ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत ।
एक शब्द में उत्तर दीजिए ।
Answer in one word. $\frac{1}{2} \times 2=1$
(i) राजा केषां मनोरथानां पूर्त्तिमकरोत् ?
(ii) ब्राह्मणः राज्ञे कानि अर्पितवान् ?

(ब) पूर्णवाक्येन उत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. $1\times 2=2$
राजा ब्राह्मणाय किं गृहीतुम् अकथयत् ?

(स) यथानिर्देशम् उत्तरत ।
यथानिर्देश उत्तर दीजिए ।
Answer as directed. $\frac{1}{2} \times 4=2$
(i) 'अकरोत्' इति क्रियापदस्य कर्तृपदं किम् ?
(ii) 'एतेषाम्' इति पदस्य विशेष्यं किम् ?
(iii) 'प्रारम्भः' इत्यस्य किं विलोमपदम् अत्र प्रयुक्तम् ?
(iv) 'यज्ञान्तस्नानम्' इति अर्थे किं पदमत्र प्रयुक्तम् ?

(ख) **पद्यम्**

यावत्स्वस्थमिदं कलेवरगृहं यावच्च दूरे जरा,
यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः ।
आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान्,
प्रोद्दीप्ते भवने च कूपखननं प्रत्युद्यमः कीदृशः ।।

**प्रश्नाः**

(अ) एकपदेन उत्तरत ।
एक शब्द में उत्तर दीजिए ।
Answer in one word. $\frac{1}{2} \times 2=1$

(i) विदुषा कस्मिन् प्रयत्नः करणीयः ?

(ii) प्रोद्दीप्ते भवने किं प्रति उद्यमः व्यर्थः ?

(ब) पूर्णवाक्येन उत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. $1 \times 2=2$

बुद्धिमता कदा आत्मश्रेयसि प्रयत्नः करणीयः ?

(स) यथानिर्देशम् उत्तरत ।
यथानिर्देश उत्तर दीजिए ।
Answer as directed. $\frac{1}{2} \times 4=2$

(i) 'शरीरम्' इति अर्थे किं पदमत्र प्रयुक्तम् ?

(ii) 'महान्' इति विशेषणपदस्य विशेष्यं किम् ?

(iii) तृतीयपंक्तौ कर्तृपदं किम् ?

(iv) 'प्रतिहता' इत्यस्य विपरीतपदं किमत्र प्रयुक्तम् ?

(ग) **नाट्यांशः**

*कौसल्या* — जात ! अस्ति ते माता ? स्मरसि वा तातम् ?

*लवः* — नहि ।

*कौसल्या* — ततः कस्य त्वम् ?

*लवः* — भगवतः सुगृहीतनामधेयस्य वाल्मीकेः ।

*कौसल्या* — अयि तात ! कथयितव्यं कथय ।

*लवः* — एतावदेव जानामि । (प्रविश्य सम्भ्रान्ताः)

*बटवः* — कुमार ! कुमार ! अश्वोऽश्व इति कोऽपि भूतविशेषो जनपदेष्वनुश्रूयते, सोऽयमधुनाऽस्माभिः स्वयं प्रत्यक्षीकृतः ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत ।
एक शब्द में उत्तर दीजिए ।
Answer in one word. $\frac{1}{2} \times 2=1$

(i) बटुभिः कः भूतविशेषः दृष्टः ?

(ii) 'अस्ति ते माता ?' इति का पृच्छति ?

(ब) पूर्णवाक्येन उत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. 2

लवः किं न जानाति ?

(स) यथानिर्देशम् उत्तरत ।
यथानिर्देश उत्तर दीजिए ।
Answer as directed. $\frac{1}{2} \times 4=2$

(i) 'सुगृहीतनामधेयस्य' इति कस्य विशेषणम् ?

(ii) 'अनुश्रूयते' इति क्रियापदस्य कर्तृपदं किम् ?

(iii) 'इदानीम्' इति अर्थे किं पदमत्र प्रयुक्तम् ?

(iv) 'अस्माभिः' इति सर्वनामपदं केभ्यः प्रयुक्तम् ?

**5.** शब्दार्थान् मेलयित्वा लिखत ।
शब्दों का अर्थों से मिलान करके लिखिए ।
Match the words with their meanings and re-write the same. $\frac{1}{2} \times 4=2$

| | **शब्दाः** | | **अर्थाः** |
|---|---|---|---|
| (अ) | अध्वरे | (i) | सम्पूर्णम् |
| (ब) | विशाम्पतिः | (ii) | सूर्यः |
| (स) | अशेषम् | (iii) | राजा |
| (द) | उष्णरश्मिः । | (iv) | यज्ञे । |

**6.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत :
रेखाङ्कित पदों के आधार पर प्रश्न-निर्माण कीजिए :
Frame questions on the basis of the underlined words : $1 \times 4=4$

(i) तस्याः दार्शनिकैः सप्तधा विभागः कृतः ।

(ii) एते सुमेरोः उत्तरतः ।

(iii) तस्याः दार्शनिकैः सप्तधा विभागः कृतः ।

(iv) अस्माभिः पर्वतः शंकवः कृताः ।

7. अधोलिखितभावार्थयोः रिक्तस्थानपूर्तिं मञ्जूषापदसहायतया कुरुत :

निम्नलिखित **दोनों** भावार्थों में मञ्जूषा में दिए गए शब्दों की सहायता से रिक्तस्थानों की पूर्ति कीजिए :

Fill in the blanks in the following **two** explanations with the help of the words given in the box : *3+3=6*

(अ) असुर्या नाम ते लोका अन्धेन तमसावृताः ।

तांस्ते प्रेत्याभि गच्छन्ति, ये के चात्महनो जनाः ।।

**भावार्थः**

आत्मनः (i) __________ ये न स्वीकुर्वन्ति, ते (ii) __________ मृत्योः अनन्तरम् (iii) __________ लोकान् गच्छन्ति ये (iv) __________ आवृताः (v) __________ च भवन्ति अर्थात् ते (vi) __________ पतन्ति ।

(ब) यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।

स यत्प्रमाणं कुरुते, लोकस्तदनुवर्तते ।।

**भावार्थः**

श्रेष्ठः (i) __________ यथा आचरणं (ii) __________ तथैव अन्ये जनाः (iii) __________ । यत्किमपि तेन (iv) __________ सर्वः लोकः अपि तस्य (v) __________ करोति, तदेव (vi) __________ मन्यते ।

**मञ्जूषा**

| |
|---|
| करोति, जनाः, तान्, घोरान्धकारेण, प्रमाणं, अनुसरणं, आचरन्ति, प्रमाणीक्रियते, सर्वव्यापकतां, जनः, घोरनरके, प्रकाशहीनाः । |

8. अधोलिखितयोः **श्लोकयोः** अन्वययोः रिक्तस्थानपूर्तिं कुरुत :

निम्नलिखित **दोनों** श्लोकों के अन्वयों में रिक्तस्थानों की पूर्ति कीजिए :

Fill in the blanks in the following prose-order-renderings of the **two** verses : $1\frac{1}{2}+1\frac{1}{2}=3$

(अ) तं भूपतिर्भासुरहेमराशिं, लब्धं कुबेरादभियास्यमानात् ।
दिदेश कौत्साय समस्तमेव, पादं सुमेरोरिव वज्रभिन्नम् ।।

**अन्वयः**

भूपतिः (i) __________ कुबेरात् लब्धम् सुमेरोः वज्रभिन्नम् पादम् इव (ii) __________ भासुरहेमराशिम् (iii) __________ एव कौत्साय दिदेश ।

(ब) उत्साहसम्पन्नमदीर्घसूत्रं,

क्रियाविधिज्ञं व्यसनेष्वसक्तम् ।

शूरं कृतज्ञं दृढनिश्चयं च,

लक्ष्मीः स्वयं वाञ्छति वासहेतोः ।।

अन्वयः

लक्ष्मीः उत्साहसम्पन्नम् अदीर्घसूत्रम् क्रियाविधिज्ञम् (i) __________ असक्तम् शूरम् कृतज्ञम् दृढनिश्चयम् च (ii) __________ वासहेतोः (iii) __________ ।

**9.** यथानिर्देशम् उत्तरत ।

यथानिर्देश उत्तर दीजिए ।

Answer as directed.

(अ) कर्तृपदं क्रियापदं च चिनुत ।

कर्ता एवं क्रियापद चुनिए ।

Select the subject and the verb. *1+1=2*

(i) अपरे तु स्वार्थनिष्पादनपरैः धूर्तैः प्रतार्यमाणाः सर्वजनस्योपहास्यतामुपयान्ति ।

(ii) विद्वांसमपि, अभिजातमपि पुरुषं खलीकरोति लक्ष्मीः इति ।

(ब) विशेषणपदं चिनुत ।

विशेषण पद चुनिए ।

Select the adjective. *1+1=2*

(i) मनुष्याः पुनः स्वचेतसा एव भविष्ये विपत्पातमाकलय्य परिकम्पमानकलेवराः दुःखेन समयमतिवाहयन्ति ।

(ii) अथ विटपिनाम् मध्यभागे स्थितः सुमहान् अश्वत्थदेवः वदति – 'सावहिताः शृण्वन्तु ।'

(स) अधोलिखितपंक्तिद्वये रेखाङ्कित-सर्वनामपदानि केभ्यः प्रयुक्तानि ?

निम्नलिखित **दो** पंक्तियों में रेखाङ्कित सर्वनाम पद किनके लिए प्रयुक्त हुए हैं ?

In the following **two** lines, for whom are the underlined pronouns used ? *1+1=2*

(i) कोऽपि शिववीरस्य विश्वासपात्रं सिंहदुर्गात् <u>तस्यैव</u> पत्रमादाय तोरणदुर्गं प्रयाति ।

(ii) दृढ़सङ्कल्पो<u>ऽयं</u> न स्वकार्याद् विरमति ।

(द) अधोलिखितपंक्तिभ्यां 'शान्तम्' तथा 'अप्रत्यागमनम्' इति पदयोः समानार्थकपदे चित्वा लिखत :

निम्नलिखित पंक्तियों में से 'शान्त' तथा 'विदाई' पदों के समानार्थक पद चुनकर लिखिए :

Select and write the synonyms of 'Shant' and 'Vidai' from the following lines : *1+1=2*

(i) मम जीवनप्रदीपो निर्वापितो भवितुमिच्छति ।

(ii) तव हस्तयोस्तव अनाथाश्रमं समर्थ्य अहं सौप्रस्थानिकीमिच्छामि ।

(य) कः कं कथयति ?

कौन किसको कह रहा है ?

Who is saying this to whom ? *1+1=2*

(i) 'हा हन्त ! तस्या अबोधबालिकायाः अग्रे किं भावि ?'

(ii) 'प्राचीनमर्यादापि तु रक्षितव्या स्यात् ।'

**10.** (अ) अधोलिखितलेखकानाम् कस्यापि **एकस्य** काव्यस्य नाम लिखत :

निम्नलिखित लेखकों के किसी **एक** काव्य का नाम लिखिए :

Write the name of any **one** work of each of the following poets : *1×5=5*

कालिदासः, भवभूतिः, अम्बिकादत्तव्यासः, पं हृषीकेश-भट्टाचार्यः, पण्डितराज-जगन्नाथः ।

(ब) अधोलिखितरचनानां लेखकानां नामानि लिखत :

निम्नलिखित रचनाओं के लेखकों के नाम लिखिए :

Write the names of the authors of the following works : *1×5=5*

समुद्रसङ्गमः, महाभारतम्, कादम्बरी, पाषाणीकन्या, शिशुपालवधम् ।

## खण्डः घ (SECTION D)

## छन्दोऽलङ्काराः

## छन्द एवं अलङ्कार

## Metres and Figures of Speech

*20 अङ्काः*

**11.** (अ) प्रश्नान् उत्तरत ।

प्रश्नों के उत्तर दीजिए ।

Answer the questions. *1×4=4*

(i) 'तम्' इति पदे स्वरः लघुः गुरुः वा ?

(ii) 'अम्बुधिः' इति पदे कः गणः ?

(iii) प्रतिचरणम् 'वसन्ततिलका' छन्दसि कति वर्णाः ?

(iv) शार्दूलविक्रीडित-छन्दसि 'सूर्य' इति पदेन किमभिप्रेतम् ?

(ब) अधोलिखित-परिभाषाः पूरयत :

निम्नलिखित परिभाषाओं को पूरा कीजिए :

Complete the following definitions : *1×3=3*

(i) 'न न __________ युतेयं मालिनी भोगिलोकैः ।'

(ii) 'रसैः रुद्रैश्छिन्ना __________ शिखरिणी ।'

(iii) '__________ अम्बुधिरसनगैः __________ ।'

(स) अधोलिखितपङ्क्त्यां किं छन्दः ?

निम्नलिखित पंक्ति में कौन-सा छन्द है ?

What is the metre in the following line ? *1*

प्रोद्दीप्ते भवने च कूपखननं प्रत्युद्यमः कीदृशः ?

(द) अधोलिखितेषु कस्यचिदे**क**स्य छन्दसः उदाहरणं लिखत :

निम्नलिखित में से किसी **एक** छन्द का उदाहरण लिखिए :

Write an example of any **one** of the following metres : *2×1=2*

अनुष्टुप्, वंशस्थम् ।

**12.** (अ) अधोलिखितानाम् अलङ्काराणां परिभाषाः पूरयतः

निम्नलिखित अलङ्कारों की परिभाषाओं को पूर्ण कीजिए :

Complete the definitions of the following figures of speech : *1×4=4*

(i) 'सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः ।

__________________ ।।'

(ii) 'भवेत् __________ प्रकृतस्य परात्मना ।'

(iii) 'भवेत् __________ ऽनुषक्तार्थान्तराभिधा ।'

(iv) 'तद्रूपकमभेदो __________ ।'

(ब) अधोलिखितेषु कस्यचिदे**क**स्य अलङ्कारस्य उदाहरणं लिखत :

निम्नलिखित में से किसी **एक** अलङ्कार का उदाहरण लिखिए :

Write an example of any **one** of the following figures of speech : *1×3=3*

श्लेषः, उपमा ।

(स) अधोलिखितेषु चरणेषु कः अलङ्कारः :

निम्नलिखित पंक्तियों में कौन-कौन-से अलङ्कार हैं :

What are the figures of speech in the following lines : *3×1=3*

(i) 'क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् ।'

(ii) 'यावन्मिलदलिमालः कोऽपि रसालः समुल्लसति ।'

(iii) 'शूरं कण्टकमिव परिहरति ।'